# संस्कृत वार्ता:

दिनाङ्क :- 15.03.2026 प्रात: - 06:55

**प्रधानमंत्री कोलकाता**

प्रधानमन्त्री नरेन्द्रमोदी गतदिने पश्चिमबंगलास्य कोलकातानगरे प्रायश: अशीत्युत्तर-षडधिक-अष्टादश-सहस्र-कोटिमितानां विविधानां विकासपरियोजनानां उद्घाटनं शिलान्यासं च कृतवान्। एतस्मिन् अवसरे कोलकातानगरस्य ऐतिहासिके ब्रिगेड-परेड-ग्राउण्डे सङ्कल्पसभां सम्बोधयन् प्रधानमन्त्री नरेन्द्रमोदी आगामि-विधानसभा-निर्वाचनं बंगालस्य अस्तित्व-आत्मरक्षा-संघर्षरूपेण प्रतिपादितवान्। प्रधानमन्त्री बंगाले वर्तमानं सत्तादलं तृणमूल-कांग्रेस इत्येतत् दलं कट्वालोचितवान् अपि।

---------------------------------------

**मन्त्रालयीय वार्ता**

भारतीय - ध्वजयुत - पोतद्वयं शिवालिक - नन्दादेवी इत्येतद् गतदिने होर्मुज जलडमरूमध्य इत्येतत् मार्गं सुरक्षितरूपेण संक्रान्तवत्। जलपत्तन – पोतपरिवहन – जलमार्ग – मन्त्रालयस्य विशेष सचिव: राजेश कुमारासिन्हा: गतदिने नवदेहल्यां अन्तर्मन्त्रालयीय – संचारवार्तां सम्बोधयन् एता: सूचना: प्रकाशितवान्। पेट्रोलियम – प्राकृतिकवात- मन्त्रालयस्य संयुक्त सचिव पदासीना सुजाता शर्मा विज्ञापितवान् यत् देशे न केनायि प्रकारेण वात – इन्धन - ऊर्जाया: न्यूनता वर्तते। तथा जना: सरलतया सहजतया वातोन्धन – ऊर्जा – प्रयोगरूपेण अनावश्यक – सूचना- दूरोभूताय समाह्वानं कृतम् । सुजाता शर्मा एतदपि आह्वानं कृतवती यत् जना: वार्तान्धिन – प्राप्तीकरणे न समस्या: प्राप्स्यन्ति।

---------------------------------------

**पाक-अफगान संघर्ष:**

भारतेन अफगानभूमौ वाय्वीय – आक्रमेण नागरिकाणां मृत्यमभिलक्ष्य आकमणानां निन्दा कृता, मृतनागरिकान् प्रति स्वीय – संवेदना: प्रकाटिताश्य। विदेशमन्त्रालयस्य प्रवक्ता रणधीर – जायसवाल संचार- तन्त्रपटले प्रकाशितवान् यत् पाकिस्तान – सत्ता – प्रतिष्ठानेन कृतं आक्रमणं क्रूरता वर्तते, येन संप्रभु – अफगानिस्तानं प्रति शुत्रतापूर्ण: व्यवहार: प्रकटितो भवति।

-----------------------------------------

**प्रधानमन्त्री - माई भारत बजट क्वेस्ट**

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रभृति राज्य – केन्द्रशासित – प्रदेशस्तरे ‘ माई भारत बजट क्वेस्ट प्रतियोगिता – विजेतृभि। सह सम्बादं कुर्यात्। एतत् प्रदक्षेपं युवभ्य: कन्द्रीय – आय व्यय – पत्रके चर्चाकरणाय विकसित भारतनिर्माणे स्वीयविचार विनिमयोकरणाय च प्रोत्साहयति। एतस्य कार्यक्रमस्य उद्देश्य युव – प्रतिभागिन: शासन – आर्थिक नियोजनें च सम्मिलीकरणं वर्तते। अत्र यूनां बाहुल्येन प्रतिक्रिया: सम्प्राप्ता:, यत्र द्वादशलक्षाधिकै: युवभि: भाग: गृहति:, येन शिक्षा – कौशल – विकास – नवाचार - विषया: सुदृढा: भर्वान्त।

-----------------------------------------

**नमनपुरस्कार समारोह**

भारतीय – क्रिकेट् – कन्ट्रोल – बोर्ड बी सी सी आई इत्यतेद् द्वारा अद्य नवदेहल्यां प्रतिष्ठित: नमनपुरस्कार समारोह: समायोजयेत्, यत्र रोजर-बिन्नी – राहुल द्रविड: च कर्नल – सी. के नायडू – लाइफटाइम – अचीवमेंट – पुस्कारेण सभाजयेताम्। तत्रैव महिला – क्रिकेट – मध्ये पूर्व-महिला – क्रिकेट – क्रीडिका मिताली – राज: अपि सभाजयेत्। एतदतिरिच्य नमनपुरस्कार-समारोहे क्रिकेट् – जगति उत्कृष्ट – प्रदर्शनाय अपि नैके पुरस्कारा: प्रदास्यन्ते।

------------------------------------------

**ऋतुविकास:**

भारतीय ऋतु-विज्ञान-विभागेन प्रोक्तं यत् झारखण्डे अद्य उष्ण-लहर्य्या: प्रकोप: प्रभावि भविष्यति। अरूणाचल प्रदेश-असम-मेघालये मार्च पञ्चदशे दिनांके भीषण-वृष्टे: संभावना अपि वर्तते। एतिदतिरिच्च बहुषु क्षेत्रेषु दिल्ली-पञ्जाब-उत्तरप्रदेश-हरियाणा-चंडीगढ़-हिमाचलप्रदेश-जम्मू-कश्मीर लद्दाख-उत्तराखण्डे च ओलावृष्टि: अपि संभाव्यते। अन्ये च पूर्वोत्तरीय राज्येषु वृष्टे: अनुमानोऽभि व्यक्त:।

।। इति वार्ता:।।